# अघमर्षणसूक्तम्

हिरण्यशृङ्गं वरुणं प्रपद्ये तीर्थं मे देहि याचितः। यन्मया भुक्तमसाधूनां पापेभ्यश्च प्रतिग्रहः। यन्मे मनसा वाचा कर्मणा वा दुष्कृतं कृतम्। तन्न इन्द्रो वरुणो बृहस्पतिः सविता च पुनन्तु पुनः पुनः। नमोऽग्नयेऽप्सुमते नम इन्द्राय नमो वरुणाय नमो वारुण्यै नमोऽद्भ्यः।।

यदपां क्रूरं यदमेध्यं यदशान्तं तदपगच्छतात्। अत्याशनादतीपानाद्यच्च उग्रात् प्रतिग्रहात्। तन्नो वरुणो राजापाणिनाह्यवमर्शतु। सोऽहमपापो विरजो निर्मुक्तो मुक्तकिल्बिषः। नाकस्य पृष्ठमारुह्य गच्छेद्ब्रह्मसलोकताम्। यश्चाप्सु वरुणस्स पुनात्वघमर्षणः। इमं मे गङ्गे यमुने सरस्वति शुतुद्रिस्तोमँ सचता परुष्णिया। असिक्निया मरुद्वृधे वितस्तयाऽऽर्जीकीये शृणुह्यासुषोमया। ऋतं च सत्यं चाभीद्धात्तपसोऽध्यजायत। ततो रात्रिरजायत ततःसमुद्रो अर्णवः।।

समुद्रादर्णवा दधि संवथ्सरो अजायत। अहोरात्राणि विदधद्विश्वस्य मिषतो वशी। सूर्याचन्द्रमसौ धाता यथापूर्व-मकल्पयत्। दिवं च पृथिवीं चान्तरिक्ष-मथो सुवः। यत्पृथिव्याँ रजस्स्वमान्तरिक्षे विरोदसी। इमाँस्तदापो वरुणः पुनात्वघमर्षणः। पुनन्तु वसवः पुनातु वरुणः पुनात्वघमर्षणः। एष भूतस्य मध्ये भुवनस्य गोप्ता। एष पुण्यकृतां लोकानेषमृत्योर्हिरण्मयम्। द्यावापृथिव्योर्हिरण्मयँ सँश्रितँ सुवः।।

सनःसुवःसँशिशाधि। आर्द्रं ज्वलति ज्योतिरहमस्मि। ज्योतिर्ज्वलति ब्रह्माहमस्मि। योऽहमस्मि ब्रह्माहमस्मि। अहमस्मि ब्रह्माहमस्मि। अहमेवाहं मां जुहोमि स्वाहा। अकार्यकार्यवकीर्णी स्तेनो भ्रूणहा गुरुतल्पगः। वरुणोऽपामघमर्षणस्तस्मात् पापात्प्रमुच्यते। रजोभूमिस्त्वमाँ रोदयस्व प्रवदन्ति धीराः। आक्रान्थ्समुद्रः प्रथमे विधर्मञ्जनयन्प्रजा भुवनस्य राजा। वृषा पवित्रे अधिसानो अव्ये बृहथ्सोमो वावृधे सुवान इन्दुः।।

।।ॐ शान्तिः शान्तिः शान्तिः ।।